## हल्–सन्धिः – सूत्रसहिता दृष्टिः

सूत्रेषु विभक्ति–अर्थः

षष्ठीविभक्तिः = स्थाने
सप्तमीविभक्तिः = पूर्वकार्यम्
पञ्चमीविभक्तिः = परकार्यम्
प्रथमाविभक्तिः = आदेशः, आगमः, नामकरणम्
तृतीयाविभक्तिः = संयोजनम्

### १. श्चुत्वसन्धिः

**स्तोः श्चुना श्चुः** (८.४.४०) = सकारस्य तवर्गस्य च स्थाने शकारस्य चवर्गस्य च आदेशः भवति, शकारस्य चवर्गस्य च योजनेन | **यथासंख्यमनुदेशः समानम्** (१.३.१०) इति परिभाषा–सूत्रेण उद्देशिनाम् अनुदेशिनां च यथाक्रमम् उद्देशिभिः अनुदेशिनः संबन्ध्यन्ते | स् च तुश्च स्तुः तस्य स्तोः, समाहारद्वन्द्वः | श् च चुश्च श्चुः, तेन श्चुना, समाहारद्वन्द्वः | श् च चुश्च श्चुः, समाहारद्वन्द्वः | स्तोः षष्ठ्यन्तं, श्चुना तृतीयान्तं, श्चुः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **स्तोः श्चुना श्चुः संहितायाम्** |

भवत् + चक्षुः → भवच्चक्षुः*
यज् + नः → यज् + ञ् + अः → यज्ञः

**शात्** (८.४.४४) = शकारात् परस्य तवर्गस्य चुत्वं न स्यात् | **स्तोः श्चुना श्चुः** (८.४.४०) इत्यस्य निषेधकसूत्रम् | शात् पञ्चम्यन्तम् एकपदमिदं सूत्रम् | **तोः षि** (८.४.४३) इत्यस्मात् **तोः** इत्यस्य अनुवृत्तिः | **न पदान्ताट्टोरनाम्** (८.४.४२) इत्यस्मात् **न** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **शात् तोः न संहितायाम्** |

प्रश् + नः → प्रश्नः |

*ध्येयं यत् यत्र सन्धिचिन्तनं भवति, सदा ज्ञातव्यं यत् प्रवर्तमानं सन्धिकार्यं पदान्ते अस्ति न वा | अत्र 'भवत् + चक्षु' इति समासस्य प्रसङ्गः; अनयोः पूर्वोत्तरपदयोः सन्धिः करणीयः | तर्हि प्रमुखप्रश्नः भवति यत् 'भवत्' इति पूर्वपदस्य पदसंज्ञा अस्ति न वा | समासस्य लौकिकविग्रहवाक्यं भवति, यथा 'भवच्चक्षुः' इत्यस्य कृते 'भवतः चक्षुः' इति लौकिकविग्रहवाक्यम् | अलौकिकविग्रहः (शास्त्रीयविग्रहवाक्यम्) अपि भवति, यस्य द्वारा समासनिर्माणं सिध्यति | यथा 'भवच्चक्षुः' इत्यस्य 'भवत् ङस् + चक्षु सु' इति भवति | अत्र प्रथमतया समासस्य प्रातिपदिकसंज्ञा भवति **कृत्तद्धितसमासाश्च** (१.२.४६) इत्यनेन सूत्रेण | तदा सुप्–प्रत्ययस्य लुक् (लोपः) भवति **सुपो धातुप्रातिपदिकयोः** (२.४.७१) इत्यनेन | 'भवत् ङस् + चक्षु सु' इत्यस्मिन् ङस्, सु इत्यनयोः लुक् → भवत् + चक्षु |

**सुप्तिङन्तं पदम्** (१.४.१४) इत्यनेन यस्य अन्ते सुप्-प्रत्ययः अस्ति, तस्य पदसंज्ञा भवति; अत्र च 'भवत्' इत्यस्य अन्ते सुप् नास्ति; तर्हि प्रश्नः उदेति यत् तस्य पदसंज्ञा अस्ति न वा | उत्तरमस्ति यत् **प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) इत्यनेन पदसंज्ञा अस्त्येव | इत्थञ्च पर्यवसितं यत्— सन्धिचिन्तनावसरे समासे पूर्वपदस्य पदसंज्ञा भवति | (लुकि सति लुप्तपदम् अधिकृत्य अङ्गकार्यं न भवति, किन्तु पदसंज्ञा इति नामकरणं न तु अङ्गकार्यम् अतः पूर्वपदस्य पदसंज्ञां निमित्तीकृत्य सन्धिकार्यम् इत्यादिकं प्रवर्तनीयम् |) एतदाधारेण—

भवत् + चक्षु → **झलां जशोऽन्ते** (८.२.३९) → भवद् चक्षु → **स्तोः श्चुना श्चुः** (८.४.४०) → भवज् चक्षु → **खरि च** (८.४.५५) → भवच् + चक्षु → वर्णमेलने → भवच्चक्षु → प्रथमाविभक्तौ एकवचने भवच्चक्षुः |

एवमेव अग्रे यत्र कुत्रापि समासः अस्ति, तत्र पूर्वपदस्य पदसंज्ञा मनसि निधाय सन्धिचिन्तनं करणीयम् |

२. ष्टुत्वसन्धिः

**ष्टुना ष्टुः** (८.४.४१) = दन्त्यसकारस्य तवर्गीयवर्णस्य च स्थाने मूर्धन्यषकारादेशः टवर्गीयवर्णादिशश्च भवतः, मूर्धन्यषकार-टवर्गीयवर्णयोः योजनेन | **यथासंख्यमनुदेशः समानम्** (१.३.१०) इति परिभाषा-सूत्रेण उद्देशिनाम् अनुदेशिनां च यथाक्रमम् उद्देशिभिः अनुदेशिनः संबन्ध्यन्ते | ष् च टुश्च ष्टुः, तेन ष्टुना, समाहारद्वन्द्वः | ष् च टुश्च ष्टुः, समाहारद्वन्द्वः | ष्टुना तृतीयान्तं, ष्टुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **स्तोः श्चुना श्चुः** (८.४.४०) इत्यस्मात् **स्तोः** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **स्तोः ष्टुना ष्टुः संहितायाम्** |

बालस् + षष्ठः → बालष्षष्ठः
बृहत् + टीका → बृहट्टीका
आकृष् + तः → आकृष्टः

**तोः षि** (८.४.४३) = तवर्गस्य ष्टुत्वं न स्यात् षकारे परे | **ष्टुना ष्टुः** (८.४.४१) इत्यस्य निषेधकसूत्रम् | तोः षष्ठ्यन्तं, षि सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **ष्टुना ष्टुः** (८.४.४१) इत्यसमत् **ष्टुः** इत्यस्य अनुवृत्तिः | **न पदान्ताट्टोरनाम्** (८.४.४२) इत्यस्मात् **न** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **तोः षि न ष्टुः संहितायाम्** |

भवान् + षष्ठः → भवान् षष्ठः [नकारस्य णकारादेशो न भवति]

**न पदान्ताट्टोरनाम्** (८.४.४२) = पदान्तात् टवर्गात् स्तोः ष्टुः न स्यात् नामः नकारं वर्जयित्वा | **ष्टुना ष्टुः** (८.४.४१) इत्यस्य निषेधकसूत्रम् | न अव्ययपदं, पदान्तात् पञ्चम्यन्तं, टोः पञ्चम्यन्तम्, अनाम् लुप्तषष्ठीकं पदम्, अनेकपदमिदं सूत्रम् | **स्तोः श्चुना श्चुः** (८.४.४०) इत्यस्मात् **स्तोः** इत्यस्य अनुवृत्तिः | **ष्टुना ष्टुः** (८.४.४१) इत्यस्मात् **ष्टुः** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **पदान्तात् टोः स्तोः ष्टुः न, अनाम् संहितायाम्** |

षट् + सन्तः → षट् सन्तः [सकारस्य षकारादेशो न भवति]
षट् + तरुणाः → षट् तरुणाः [तकारस्य टकारादेशो न भवति]

परन्तु—
षण् + नाम् → षण्णाम्
षण् + नवतिः → षण्णवतिः
षण् + नगर्यः → षण्णगर्यः

अनेन वार्तिकेन नवतिः नगर्यः इति द्वौ शब्दौ अपि अन्तर्भूतापवादौ— **अनाम्नवतिनगरीणामिति वाच्यम्** |

३. जश्त्वसन्धिः

पदान्ते जश्त्वम्—

**झलां जशोऽन्ते** (८.२.३९) = पदान्ते झलः स्थाने जशादेशो भवति | पदात् परे कोऽपि वर्णः स्यात् वा न वा, सूत्रस्य प्रसक्तिः अस्ति एव | पदात् परे अच् स्यात् हल् स्यात् वा, सूत्रस्य प्रसक्तिः अस्ति एव | बाधकसूत्रम् अस्ति चेत् अन्या वार्ता | झल् प्रत्याहारे पञ्चमवर्गीय-व्यञ्जनानि वर्जयित्वा सर्वाणि वर्गीयव्यञ्जनानि (नाम अननुनासिक-वर्गीयव्यञ्जनानि), अपि च श्, ष्, स्, ह् | प्रयोगे वर्गाणां प्रथमः, द्वितीयः, तृतीयः, चतुर्थश्च वर्णाः आयान्ति | जश् प्रत्याहारे वर्गाणां तृतीयवर्णः—ज्, ब्, ग्, ड्, द् इति | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन कवर्गीयाणां स्थाने गकारः, चवर्गीयाणां स्थाने जकारः, तवर्गीयाणां स्थाने दकारः, टवर्गीयाणां स्थाने डकारः, पवर्गीयाणां स्थाने बकारः इति | तर्हि पदस्य अन्ते झल्-प्रत्याहारे कश्चन वर्णः अस्ति चेत्, स्थाने तस्य वर्गस्य तृतीयवर्णादेशः भवति | अयं जश्त्वसन्धिः इत्युच्यते | झलां षष्ठ्यन्तं, जशः प्रथमान्तम्, अन्ते सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **पदस्य अन्ते झलां जशः** |

मरुत् + वहति → मरुद् + वहति → मरुद्वहति

झल्-प्रत्याहारे शकारः, सकारः, हकारः अपि सन्ति | तथापि एषां जश्त्वं न भवति यतोहि तत्र बाधकसूत्राणि सन्ति | पदान्ते शकारस्य षकारादेशो भवति **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** (८.२.३६) इति सूत्रेण | पदान्ते सकारस्य रु-आदेशो भवति **ससजुषो रुः** (८.२.६६) इति सूत्रेण | पदान्ते हकारस्य ढकारादेशो भवति **हो ढः** (८.२.३१) इति सूत्रेण |

सामान्यतया लोके 'पदान्ते' इत्युक्ते सुबन्तपदस्य अन्ते अथवा तिङन्तपदस्य अन्ते; एतादृशेषु स्थलेषु **सुप्तिङन्तं पदम्** (१.४.१४) इति सूत्रेण पदसंज्ञा | यथा प्रथमाविभक्तौ 'विद्युत्' इति सुबन्तपदं, तस्य अन्ते च तकारः अतः अत्र पदान्ते **झलां जशोऽन्ते** (८.२.३९) इत्यनेन तकारस्य स्थाने दकारः, विद्युद् इति भवति | एवमेव तिङन्ते 'अगच्छत्' इत्यस्मिन् तकारः पदान्ते इति कृत्वा तकारस्य स्थाने दकारः, अगच्छद् इति भवति | (तदा उभयत्र **वाऽवसाने** (८.४.५६) इत्यनेन विकल्पेन चर्त्वादेशः अतः 'विद्युत्', 'अगच्छत्' इति रूपे अपि भवतः

|) किन्तु पदसंज्ञा केवलं सुबन्तस्य अथवा तिङन्तस्य इति न | कुत्रचित् सुबन्तप्रक्रियायामपि पदसंज्ञा भवति, इत्युक्ते सुबन्तपदस्य निर्माणावसरे अपि कुत्रचित् पदसंज्ञा भवति | तत्र **स्वादिष्वसर्वनामस्थाने** (१.४.१७) इति सूत्रेण पदसंज्ञा | अस्य सूत्रस्य अर्थः इत्यादिकम् अत्र नापेक्षितं; केवलं कानिचन उदाहरणानि दीयन्ते यत्र  सुबन्तपदस्य तिङन्तपदस्य च अन्ते नास्ति चेदपि पदसंज्ञा भवति इति कारणतः तत्रपि  **झलां जशोऽन्ते** (८.२.३९) इत्यनेन एव जश्त्वं भवति | यथा अत्र 'द्विष्', 'षष्' इत्यनयोः पदसंज्ञा भवति—

द्विष् + भ्याम् → द्विड्भ्याम्
षष् + भिस् → षड्भिः

अधुना 'षडाननः' इति समासः | सुबन्तयोः एव समासो भवति अतः प्रथमतया षष् + जस् + आनन + जस् इति भवति | षष् इति प्रातिपदिकं नित्यं बहुवचनान्तम् | तदर्थं प्रथमाविभक्तौ सु–औ–जस् इत्येषु बहुवचनार्थे जस् इत्येव विधीयते | तदा विशेषणविशेष्यभावे आननशब्दस्य अपि बहुवचनान्तत्वम् | षष् जस् + आनन जस् इति अलौकिकविग्रहः | षष्–शब्दः षकारान्त–सङ्ख्यावाचकः | **ष्णान्ता षट्** (१.१.२४) इत्यनेन षान्तानां नान्तानां च सङ्ख्यावाचकानां षट्–संज्ञा भवति | (धेयं यत 'षट्–संज्ञा' इति पाणिनेः एका विशिष्टसंज्ञा अस्ति; अस्याः तु षट्–शब्दस्य प्रयोगेणापि षट् इति सङ्ख्यायाः अर्थो नास्ति |) षष् इत्यस्य षान्तसङ्ख्यावाचकत्वात् षट्–संज्ञा | षट्–संज्ञायां **षड्भ्यो लुक्** (७.१.२२) इत्यनेन षड्भ्यः परयोः जस्–शसोः लुक् स्यात् | तस्मात् षष् इत्यस्य जसः लुक् भवति | षष् जस् → षष् इत्येव सुबन्तं*; सुबन्तत्वात् **सुप्तिङन्तं पदम्** (१.४.१४) इति सूत्रेण एव पदसंज्ञा | ततः **झलां जशोऽन्ते** (८.२.३९) इत्यनेन षकारस्य स्थाने डकारः, षड् इति भवति | इदं षडानन–पदं बहुव्रीहिः इति कारणतः अन्ततो गत्वा षड् आननानि यस्य सः षडाननः इति कृत्वा एकवचने पुंलिङ्गे भवति |

षष् + आननः → **झलां जशोऽन्ते** (८.२.३९) इत्यनेन षकारस्य जश्त्वम् → षडाननः

*षष् इत्यस्य जसः लुक् जातं चेदपि **प्रत्ययलोपे प्रत्ययलक्षणम्** (१.१.६२) इति सूत्रेण प्रत्ययलक्षणं भवति | अतः 'जस्' इति सुप्–प्रत्ययः अधुना न दृश्यते चेदपि षष् सुबन्तम् इति मन्तव्यम् | 'जसः लुक्' इति कारणतः **न लुमताऽङ्गस्य** (१.१.६३) इत्यनेन 'प्रत्ययलक्षणं न' इति चिन्त्यते चेत्, दोषो भवति | **न लुमताऽङ्गस्य** (१.१.६३) इत्यनेन यस्मिन् शब्दे 'लु' अस्ति, तेन शब्देन प्रत्ययादर्शनं विहितं चेत् सः प्रत्ययः अङ्गकार्यस्य निमित्तं न स्यात् | परन्तु अत्र अङ्गकार्यस्य विषयो नास्ति; अत्र 'पद' इति संज्ञा–विधानं न तु अङ्गकार्यम् |

एतावता पदान्ते जश्त्वस्य उदाहरणानि दत्तानि आसन् |

अत्र अपदान्ते जश्त्वम्—

**झलां जश् झशि** (८.४.५३) = झलां स्थाने जशादेशो भवति झशि परे | झश्–प्रत्याहारे वर्गाणां तृतीयचतुर्थाः च वर्णाः अन्तर्भूताः | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन जश्–वर्णेषु वर्णनिर्धारणम् | झलां षष्ठ्यन्तं, जशः प्रथमान्तम्, झशि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **झलां जश् झशि संहितायाम्** |

उष् + ढि → उड् + ढि → उड्ढि

४. <u>चर्त्वसन्धिः</u>

**खरि च** (८.४.५५) = झलः स्थाने चरादेशो भवति खरि परे | खरि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **झलां जश् झशि** (८.४.५३) इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः; **अभ्यासे चर्च** (८.४.५४) इत्यस्मात् **चर्च** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **झलां चर् खरि च संहितायाम्** |

अनेन सूत्रेण अपदान्ते चर्त्वादेशः नित्यः—

त्यग् + स्यति → **खरि च** (८.४.५५) → त्यक् + स्यति (→ **आदेशप्रत्यययोः** (८.३.५९) इत्यनेन षत्वम् → त्यक्ष्यति)

समासे अपि द्वयोः पदयोः संयोजनेन नूतनसमस्तपदस्य निर्माणे सति अपदान्ते चर्त्वादेशः नित्यः—

अस्मद् + पुत्रः → **खरि च** (८.४.५५) → अस्मत्पुत्रः

वाक्यस्य स्तरे सन्धिः एव वैकल्पिकः; वाक्यस्तरे सन्धिः वक्तुः इच्छा इति चेत्, **खरि च** (८.४.५५) इत्यनेन चर्त्वं नित्यम्—

सुहृद् पठति → सुहृत्पठति

वाक्यस्य अन्ते परन्तु स्थितिः भिन्ना; तत्र च भिन्नसूत्रेण चर्त्वं विधीयते—

**वाऽवसाने** (८.४.५६) = अवसाने झलः विकल्पेन चर्-आदेशो भवति | अनेन अवसानावस्थायां विकल्पेन जश्त्वं चर्त्वं वा | वा अव्ययपदम्, अवसाने सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **झलां जश् झशि** (८.४.५३) इत्यस्मात् **झलां** इत्यस्य अनुवृत्तिः | **अभ्यासे चर्च** (८.४.५४) इत्यस्मात् **चर्** इत्यस्य अनुवृत्तिः | अनुवृत्ति-सहितसूत्रम्— **अवसाने झलां चरो वा** |

वदनावसरे लेखनावसरे च अग्रे कोऽपि शब्दः एव नास्ति चेत् 'अवसानम्' इत्युच्यते | वाक्यस्य अन्ते पूर्णविरामः भवति, अतः तत्र 'अवसान'-संज्ञा भवति | तदर्थं संज्ञासूत्रम् अस्ति—

**विरामोऽवसानम्** (१.४.११०) = वर्णानाम् अभावः अवसानसंज्ञकः | विरामः प्रथमान्तम्, अवसानं प्रथमान्तं, द्विपदमिदं सूत्रम् | सूत्रं स्वयं सम्पूर्णं— **विरामः अवसानम्** |

यथा—

अस्ति विद्युत्।

अस्मिन् वाक्ये विद्युत् इति पदम् अस्ति; पदान्ते तकारो विद्यते अतः **झलां जशोऽन्ते** (८.२.३९) इत्यनेन नित्यं दकारादेशो भवति—

विद्युत् → **झलां जशोऽन्ते** (८.२.३९) → विद्युद्

अधुना अस्मिन्नेव वाक्ये विद्युत्–शब्दः वाक्यस्य अन्ते अस्ति; ततः अग्रे कोऽपि शब्दः नास्ति इति कृत्वा **विरामोऽवसानम्** (१.४.११०) इत्यनेन अवसान–संज्ञा। तदर्थञ्च **वाऽवसाने** (८.४.५६) इत्येनन विकल्पेन चर्त्वादिशो भवति—

विद्युत् → तकारः पदान्ते, **झलां जशोऽन्ते** (८.२.३९) इत्यनेन नित्यं जश्त्वादेशः→ विद्युद् → दकारः अवसाने, **वाऽवसाने** (८.४.५६) इत्येनन विकल्पेन चर्त्वादिशः → विद्युत् / विद्युद्

५. अनुनासिकसन्धिः

**यरोऽनुनासिकेऽनुनासिको वा** (८.४.४५) = पदान्तस्य यरः अनुनासिको वा स्यात् अनुनासिके परे। **स्थानेऽन्तरतमः** इत्यनेन निर्धारणं क्रियते। कार्यं वैकल्पिकं; प्रत्यये परे तु नित्यम्। यर्–प्रत्याहारे हकारं वर्जयित्वा सर्वे हल्–वर्णाः अन्तर्भूताः। यरः षष्ठ्यन्तं, अनुनासिके सप्तम्यन्तम्, अनुनासिकः प्रथमान्तं, वा अव्ययपदम्, अनेकपदमिदं सूत्रम्। **न पदान्ताट्टोरनाम्** (८.४.४२) इत्यस्मात् **पदान्तात्** इत्यस्य अधिकारः, तस्य च विभक्तिपरिमाणः इति कृत्वा षष्ठीविभक्तौ भवति। **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः। अनुवृत्ति–सहितसूत्रम्— **पदान्तस्य यरः अनुनासिकः वा अनुनासिके संहितायाम्।**

तस्मात् + न → तस्मान्न (अपक्षे तस्माद्न, **झलां जशोऽन्ते** (८.२.३९) इत्यनेन)
सुहृद् + मित्रम् → सुहृन्मित्रम्, सुहृद्मित्रम्
वाग् + मूलम् → वाङ्मूलम्, वाग्मूलम्

प्रत्ययानुनासिके परे नित्यं भवति **प्रत्यये भाषायां नित्यम्** इति वार्तिकेन।

चिद् + मयम् → चिन्मयम्
तद् + मात्रम् → तन्मात्रम्

६. अनुस्वारसन्धिः

**मोऽनुस्वारः** (८.३.२३) = पदान्तस्य मकारस्य स्थाने अनुस्वारादेशः भवति हलि परे। मः षष्ठ्यन्तम्, अनुस्वारः प्रथमान्तं, द्विपदमिदं

सूत्रम् | **हलि सर्वेषाम्** (८.३.२२) इत्यस्मात् **हलि** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **पदस्य मः अनुस्वारः हलि संहितायाम्** |

गृहम् + च → गृहं च

**नश्चापदान्तस्य झलि** (८.३.२४) = अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारादेशो भवति झलि परे | झल्–प्रत्याहारे वर्गस्य प्रथमः, द्वितीयः, तृतीयः, चतुर्थः च वर्णाः अपि च श्, ष्, स्, ह् इति वर्णाः अन्तर्भूताः | पदस्य अन्तः पदान्तः, न पदान्तः अपदान्तः तस्य अपदान्तस्य | नः षष्ठ्यन्तं, च अव्ययपदम्, अपदान्तस्य षष्ठ्यन्तं, झलि सप्तम्यन्तं, अनेकपदमिदं सूत्रम् | **मोऽनुस्वारः** (८.३.२३) इत्यस्मात् **मः**, **अनुस्वारः** इत्यनयोः अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अपदान्तस्य मः नः च अनुस्वारः झलि संहितायाम्** |

रम् + स्यते → रंस्यते

७. <u>परसवर्णसन्धिः</u>

**अनुस्वारस्य ययि परसवर्णः** (८.४.५८) = अनुस्वारस्य स्थाने परसवर्णादेशो भवति ययि परे | परस्य सवर्णः, परसवर्णः, षष्ठी तत्पुरुषः | अनुस्वारस्य षष्ठ्यन्तं, ययि सप्तम्यन्तं, परसवर्णः प्रथमान्तं, त्रिपदमिदं सूत्रम् | यय्–प्रत्याहारे श्, ष्, स्, ह् एतान् वर्जयित्वा सर्वे हल्–वर्णाः अन्तर्भूताः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अनुस्वारस्य परसवर्णः ययि संहितायाम्** |

मुं + चति → मुञ्चति

**वा पदान्तस्य** (८.४.५९) = पदान्तस्य अनुस्वारस्य परसवर्णादिशो वा भवति ययि परे | **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यस्य बाधकसूत्रम्; अनेन पदान्ते परसवर्णादिशः वैकल्पिकः न तु नित्यः | वा अव्ययपदं, पदान्तस्य षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यस्य पूर्णतया अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **पदान्तस्य अनुस्वारस्य वा परसवर्णः ययि संहितायाम्** |

गृहम् + च → गृहञ्च / गृहं च

यकारः, वकारः, लकारः परः चेत्, अनुस्वारस्य स्थाने क्रमेण य्ँ–कारः, व्ँ–कारः, ल्ँ–कारः च भवति |

सम् + यमः → सं + यमः → सय्ँयमः / संयमः
सम् + वादम् → सं + वादम् → सव्ँवादम् / संवादम्

सम् + लापः → सं + लापः → सल्ँलापः / संलापः

धेयं यत् 'सम्' इति उपसर्गः अस्ति, अतः इदं सर्वं कार्यं पदान्ते— **मोऽनुस्वारः** (८.३.२३), **वा पदान्तस्य** (८.४.५९) इत्याभ्यां सूत्राभ्याम् |

**तोर्लि** (८.४.६०) = तवर्गस्य लकारे परे परसवर्णः | तोः षष्ठ्यन्तं, लि सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यस्मात् **परसवर्णः** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **तोः परसवर्णः लि संहितायाम्** |

त्, थ्, द्, ध्, एभ्यः परो लकारः अव्यवहितः चेत् जश्त्वं कृत्वा दकारः, तदा **तोर्लि** (८.४.६०) इत्यनेन लकारादेशः |

तत् + लयः → तद् + लयः → तल् + लयः → तल्लयः |

नकारात् परो लकारः अव्यवहितश्चेत् नकारस्य परसवर्णः अनुनासिकः लकारः भवति |

विद्वान् + लिखति → विद्वाल्ँलिखति |

८. <u>ङमुडागमसन्धिः</u>

**ङमो ह्रस्वादचि ङमुण् नित्यम्** (८.३.३२) = ह्रस्वात् स्वरात् परः यः ङम्, तदन्तात् पदात् उत्तरस्य अचः ङमुट्-आगमो भवति नित्यम् | ङम्-प्रत्याहारे ङ्, ण्, न् इति वर्णाः अन्तर्भूताः | **येन विधिस्तदन्तस्य** (१.१.७२) इति सूत्रेण **ङमन्तात् पदात्** इति फलितार्थो भवति | ङमुट् इत्यस्मिन् टकारः इत्-संज्ञकः, उकारः उच्चारणार्थः, ङम् च प्रत्याहारः; अनेन त्रयः आगमाः ङुट्, णुट्, नुट् च | **यथासंख्यमनुदेशः समानम्** (१.३.१०) इत्यनेन पदान्ते क्रमेण ङकारः चेत् ङुडागमः, णकारः चेत् णुडागमः, नकारश्च चेत् नुडागमः | ङमः पञ्चम्यन्तं, ह्रस्वात् पञ्चम्यन्तम्, अचि सप्तम्यन्तं, ङमुट् प्रथमान्तं, नित्यं क्रियाविशेषणं द्वितीयान्तम्, अनेकपदमिदं सूत्रम् | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः, विभक्तिपरिणामेन **पदात्** | अनुवृत्ति-सहितसूत्रं— **ह्रस्वात् ङमः पदात् ङमुट् अचि नित्यं संहितायाम्** |

कुर्वन् + अस्मि → कुर्वन्नस्मि

९. <u>पूर्वसवर्णसन्धिः</u>

**झयो होऽन्यतरस्याम्** (८.४.६२) = झयः उत्तरस्य हकारस्य विकल्पेन पूर्वसवर्णादेशो भवति | अन्यतरस्याम् इत्युक्ते विकल्पेन | झयः पञ्चम्यन्तं, हः षष्ठ्यन्तम्, अन्यतरस्यां सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **उदः स्थास्तम्भोः पूर्वस्य** (८.४.६१) इत्यस्मात् **पूर्वस्य** इत्यस्य

अनुवृत्तिः; **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यस्मात् **सवर्णः** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **झयः हः पूर्वस्य सवर्णः संहितायाम् अन्यतरस्याम्** |

यद्यपि झय् इत्युक्ते सर्वाणि अननुनासिक-वर्गीयव्यञ्जनानि, तथापि अत्र सर्वत्र **झलां जशोऽन्ते** (८.२.३९) इत्यनेन जश्त्वं कृत्वा तृतीयसदस्यादेशो भवति |

धर्म्यात् + हि → **झलां जशोऽन्ते** (८.२.३९) → धर्म्याद् + हि = धर्म्याद्धि /धर्म्याद्हि
वणिक् + हसति → **झलां जशोऽन्ते** (८.२.३९) → वणिग् + हसति
तत् + हितम् → **झलां जशोऽन्ते** (८.२.३९) → तद् + हितम्

अन्यच्च अवधेयं यत् हकारस्य पूर्वसवर्णादेशः सर्वत्र पूर्वतनवर्णस्य वर्गस्य चतुर्थः सदस्यः | नादः, घोषः, संवारः, महाप्राणः इति कारणतः | सामान्यतया सावर्ण्यं ज्ञायते मुखस्य स्थानेन; परन्तु यत्र स्थानेन निर्णयः असम्भवः, तत्र आभ्यन्तरप्रयत्नः प्रयुज्यते; यत्र आभ्यन्तरप्रयत्नेन निर्णयः असम्भवः, तत्र बाह्यप्रयत्नः प्रयुज्यते | हकारस्य स्थानम् अस्ति कण्ठः; किन्तु अननुनासिक-वर्गीयव्यञ्जनेषु एकैकस्मिन् वर्गे सर्वेषां स्थानं समानम् इति कारणतः स्थानेन निर्णयः अशक्यः | हकारस्य आभ्यन्तरप्रयत्नः ऊष्माणः; श्, ष्, स्, ह् इत्येव ऊष्माणाः अतः अनेन निर्णयः असम्भवः | हकारस्य बाह्यप्रयत्नः नादः, घोषः, संवारः, महाप्राणः | नादः, घोषः, संवारः इत्यस्ति वर्गीयव्यञ्जनानां तृतीय-चतुर्थ-पञ्चमाः च सदस्याः; तेषु केवलं चतुर्थसदस्यः महाप्राणः अतः हकारस्य स्थाने तत्तद्वर्गस्य चतुर्थसदस्यादेशो भवति | अत्र बाह्यप्रयत्नः इत्यनेन एव निर्णयः सम्भवति |

जगतः हिताय → समासे कृते → जगत् + हिताय → **झलां जशोऽन्ते** (८.२.३९) इत्यनेन जश्त्वम् → जगद् + हिताय → **झयो होऽन्यतरस्याम्** (८.४.६२) इत्यनेन विकल्पेन पूर्वसवर्णादेशः → जगद्धिताय/जिगद्हिताय

अत्र प्रश्नः उदेति यत् **झयो होऽन्यतरस्याम्** (८.४.६२) इति सूत्रस्य अन्तर्गतानि उदाहरणानि सर्वाणि पदान्ते; अपदान्ते दृष्टान्तो न दीयते | अपि च उच्यते यत् अस्य सूत्रस्य प्रवर्तनात् प्रागेव सर्वत्र **झलां जशोऽन्ते** (८.२.३९) इत्यस्य कार्यं भवति | **झलां जशोऽन्ते** (८.२.३९) केवलं पदान्ते प्रसक्तम् | तर्हि अनेन अवगन्तव्यं किं यत् **झयो होऽन्यतरस्याम्** (८.४.६२) केवलं पदान्ते प्रवर्तते ?

वस्तुतः 'अपदान्ते' इत्युक्ते हकारः कस्यचित् प्रत्ययस्य आदौ भवेत्; एक एव प्रत्ययः हकारादिः— हि-प्रत्ययः | किन्तु झयः परः हि-प्रत्ययो वर्तते चेत् **हुझल्भ्यो हेर्धिः** (६.४.१०१) इत्यनेन धि-आदेशो भवति; तस्मात् हि-प्रत्यये परे **झयो होऽन्यतरस्याम्** (८.४.६२) इत्यस्य प्रसक्तिर्नास्ति | वच् + हि → **हुझल्भ्यो हेर्धिः** (६.४.१०१) → वच् + धि → → वग्धि |

अतः **झयो होऽन्यतरस्याम्** (८.४.६२) इति सूत्रस्य कार्यं पदान्ते एव | तस्य च व्याख्याने समाधानं द्विधा वक्तुं शक्यते—
१) **वा पदान्तस्य** (८.४.५९) इत्यस्मात् विभक्तिपरिणामं कृत्वा **पदान्तात्** इति अनुवृत्तिः स्वीकार्या |
२) लोके अपदान्ते सूत्रस्य न कुत्रापि अवसरः इति कृत्वा सूत्रे 'पदान्ते' इति कथनस्य आवश्यकता नास्त्येव | अनेन लाघवम्— अपदान्ते न प्राप्यते, अतः पदान्ते नोक्तम् |

**हुझल्भ्यो हेर्धिः** (६.४.१०१) = हु–धातुतः झलन्तेभ्यः धातुभ्यश्च हि–प्रत्ययस्य स्थाने धि–आदेशो भवति | **येनविधिस्तदन्तस्य** (१.१.७२) इत्यनेन झलेभ्यः इति विशेषणेन तेभ्यः अङ्गेभ्यः येषाम् अन्ते झल् | हुश्च झलश्च तेषामितरेतरद्वन्द्वो हुझलः, तेभ्यो हुझल्भ्यः | हुझल्भ्यः पञ्चम्यन्तं, हेः षष्ठ्यन्तं, धिः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **अङ्गस्य** (६.४.११) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **हुझल्भ्यः अङ्गेभ्यः हेः धिः** |

पूर्वसवर्णविशेषः— 'उत्थानम्'

**उदः स्थास्तम्भोः पूर्वस्य** (८.४.६१) = उत्–उपसर्गोत्तरयोः स्था–स्तम्भ–धात्वोः पूर्वसवर्णादेशो भवति | स्था च स्तम्भ् च तयोरितरेतरद्वन्द्वः स्थास्तम्भौ, तयोः स्थास्थम्भोः | उदः पञ्चम्यन्तं, स्थास्तम्भोः षष्ठ्यन्तं, पूर्वस्य षष्ठ्यन्तं, त्रपदमिदं सूत्रम् | **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इत्यस्मात् **सवर्णः** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **उदः स्थास्तम्भोः पूर्वस्य सवर्णः संहितायाम्** |

**आदेः परस्य** (१.१.५४) = परस्य स्थाने यत् कार्यं विधीयते, तत् आदिमस्य अलः एव स्थाने भवति | पञ्चमीविभक्तौ यत् कार्यं निर्दिष्टं, तत् अग्रिमशब्दस्वरूपस्य आदिमवर्णस्य एव स्थाने न तु सम्पूर्णशब्दस्वरूपस्य | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्य बाधकसूत्रम् | आदेः षष्ठ्यन्तं, परस्य षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **स्थानेऽन्तरतमः** (१.१.५०) इत्यस्मात् **स्थाने** इत्यस्य अनुवृत्तिः | **अलोऽन्त्यस्य** (१.१.५२) इत्यस्मात् **अलः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रं— **परस्य आदेः अलः स्थाने** |

**झरो झरि सवर्णे** (८.४.६५) = हल्–उत्तरस्य झरः विकल्पेन लोपः सवर्णझरि परे | झरः षष्ठ्यन्तं, झरि सप्तम्यन्तं, सवर्णे सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **हलो यमां यमि लोपः** (८.४.६४) इत्यस्मात् **हलः**, **लोपः** चेत्यनयोः अनुवृत्तिः | **झयो होऽन्यतरस्याम्** (८.४.६२) इत्यस्मात् **अन्यतरस्याम्** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **हलः झरः लोपः अन्यतरस्यां सवर्णे झरि संहितायाम्** |

उत् + स्थानम् → **झलां जशोऽन्ते** (८.२.३९) इत्यनेन पदान्ते झलः स्थाने जशादेशः → उद् + स्थानम् → **खरि च** (८.४.५५)→ उत् + थानम् → **आदेः परस्य** (१.१.५४) इत्यस्य साहाय्येन **उदः स्थास्तम्भोः पूर्वस्य** (८.४.६१) इत्यनेन पञ्चम्यन्तस्य 'उदः' इत्यस्य अग्रिमशब्दस्य प्रथमवर्णस्य स्थाने पूर्वसवर्णादेशः → 'स्थानम्' इत्यस्य सकारस्य पूर्वसवर्णादेशः, नाम दकारस्य दन्त्यवर्गे (तवर्गे) सकारेण तुल्यः वर्णः → **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन सकारस्य स्थाने थकारादेशः* → उत् + थ्थानम् → **झरो झरि सवर्णे** (८.४.६५) इत्यनेन हल्–उत्तरस्य झरः विकल्पेन लोपः सवर्णझरि परे अतः विकल्पेन थकारलोपः → उत् + थानम् / थ्थानम् → वर्णमेलने → उत्थानम् / उत्थ्थानम्

*सर्वेषां दन्त्यवर्णानां (त्, थ्, द्, ध्, न्, ल्, स् इत्येषां) मुखस्य उच्चारणस्थानं समानमेव | अतः अनेन तेषु, सकारस्य स्थाने कः आदेशः भवेत् इति निर्णेतुं न शक्यते | तदा आभ्यन्तरप्रयत्नेन अपि न शक्यते यतोहि सर्वेषां वर्गीयव्यञ्जनानाम् (अत्र त्, थ्, द्, ध्, न् इत्येषाम्) आभ्यन्तरप्रयत्नः स्पृष्टः; नाम एते वर्णाः स्पर्शाः | तदा लकारस्य आभ्यन्तरप्रयत्नः ईषत्स्पृष्टः, नाम अयम् अन्तःस्थवर्णः |

सकारस्य तु ईषद्विवृतः, नाम अयं वर्णः ऊष्माणः | आभ्यन्तरप्रयत्नेन त्, थ्, द्, ध्, न्, ल् इत्येभ्यः सकारः भिन्नः अतः अनेनापि निर्णयो न सम्भवति | किन्तु बाह्यप्रयत्ने समाधानं प्राप्यते— तकारथकारयोः बाह्यप्रयत्नः विवारः, श्वासः, अघोषः; द्वयोः मध्ये थकारः महाप्राणः | सकारः अपि तथैव विवारः, श्वासः, अघोषः, महाप्राणः अतः सकारस्य स्थाने थकारादेशो भवति |

एवमेव उत् + स्तम्भनम् → उत्तम्भनम् / उत्थ्तम्भनम्

१०. छत्वसन्धिः

**शश्छोऽटि** (८.४.६३) = पदान्तस्य झयः उत्तरस्य शकारस्य अटि परे छकारादेशो भवति अन्यतरस्याम् | शः षष्ठ्यन्तं, छः प्रथमान्तम्, अटि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **झयो होऽन्यतरस्याम्** (८.४.६२) इत्यस्मात् **झयः** च **अन्यतरस्त्याम्** चेत्यनयोः अनुवृत्तिः | **वा पदान्तस्य** (८.४.५९) इत्यस्मात् **पदान्तस्य** इत्यस्य अनुवृत्तिः; विभक्तिपरिणामेन '**पदान्तात्**' | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अट् प्रत्याहारे सर्वे स्वराः, ह्, य्, व्, र् चान्तर्भूताः | अनुवृत्ति–सहितसूत्रं— **पदान्तात् झयः शः छः अटि संहितायम् अन्यतरस्याम्** |

धेयं यत् **शश्छोऽटि** त्रिपादी सूत्रम् अतः प्रथमं श्चुत्वं, जश्त्वं, चर्त्वम् इत्यादिकं करणीयम् | सामान्यतया चर्त्वम् अन्तिमं फलम् अतः यद्यपि झयः उक्तः, परन्तु व्यवहारे शः प्राक् चर् इति सामान्यम् |

तत् + शिवः → **झलां जशोऽन्ते** (८.२.३९) इत्यनेन पदान्ते झलः स्थाने जशादेशः → तद् + शिवः → **स्तोः श्चुना श्चुः** (८.४.४०) इत्यनेन शकारस्य प्रभावेण दकारस्य श्चुत्वम् → तज् + शिवः → **खरि च** (८.४.५५) इत्यनेन झलः स्थाने चरादेशः खरि परे → तच् + शिवः → **शश्छोऽटि** (८.४.६३) इत्यनेन पदान्तस्य झयः उत्तरस्य शकारस्य अटि परे छकारादेशः अन्यतरस्याम् → तच्छिवः / तच्शिवः

**छत्वममीति वाच्यम्** इति वार्तिकेन इदं कार्यं न केवलम् अटि परे अपि तु अमि परेऽपि | तत् + श्लोकेन → तच्छ्लोकेन |

११. सत्वसन्धिः

अस्मिन् सन्धौ अनेकसूत्राणि क्रमेण कार्यं कुर्वन्ति | सङ्क्षेपे पदान्त–नकारस्य स्थाने रु, तस्मात् रु इत्यस्मात् पूर्वं च विद्यमानस्वरः विकल्पेन अनुनासिकः; अननुनासिके पक्षे अनुस्वारागमः | तदा रु–स्थाने सकारः |

गच्छन् + तावता → गच्छ + रु + तावता → गच्छँ / गच्छं + रु + तावता → गच्छँ / गच्छं + स् + तावता → गच्छँस्तावता / गच्छंस्तावता

**नश्छव्यप्रशान्** (८.३.७) = अम्–परे छवि नकारान्तस्य पदस्य रुः स्यात्, न तु प्रशान्–शब्दस्य | छव्–प्रत्याहारे छ्, ठ्, थ्, च्, ट्, त् अन्तर्भूताः | अम्–प्रत्याहारे सर्वे स्वराः, यरलवमनाश्च अन्तर्भूताः | **अम्–परे छवि** इत्युक्ते कीदृशः छव् ? यस्मात् अम्–प्रत्याहारे कश्चन

वर्णो विद्यते | **येन विधिस्तदन्तस्य** (१.१.७२) इति सूत्रेण **नः पदस्य** इत्युक्ते तादृशपदस्य यस्य अन्ते नकारो भवति | 'पदान्ते' उक्तं 'भवन्ति' इत्यादिषु नकारस्य रुत्वनिवारणार्थम् | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन पदस्य अन्तिमवर्णस्य स्थाने रु–आदेशः | नः षष्ठ्यन्तं, छवि सप्तम्यन्तम्, अप्रशान् षष्ठ्यर्थकं प्रथमान्तं, त्रिपदमिदं सूत्रम् | **मतुवसो रु सम्बुद्धौ छन्दसि** इत्यस्मात् **रु** इत्यस्य अनुवृत्तिः; **पुमः खय्यम्परे** इत्यस्मात् **अम्परे** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **नः पदस्य रु अम्–परे छवि संहितायाम् अप्रशान्** |

क्रमः एवं भवति—

**नश्छव्यप्रशान्** इत्यनेन पदान्ते न् → रु; **उपदेशेऽजनुनासिक इत्, तस्य लोपः** इत्याभ्यां रु → र्; **अत्रानुनासिकः पूर्वस्य तु वा** इत्यनेन विकल्पेन अनुनासिकः ( ँ)–आदेशः; **अनुनासिकात् परोऽनुस्वारः** इत्यनेन अनुनासिकस्य अपक्षे अनुस्वार–आगमः; **खरवसानयोर्विसर्जनीयः** इत्यनेन र् → विसर्गः (ः); **विसर्जनीयस्य सः** इत्यनेन विसर्गः → स् | तदा यथासङ्गं श्चुत्वं ष्टुत्वं च |

यथा—

कस्मिन् + चित् → कस्मि + रु + चित् → कस्मिर् + चित् → कस्मिँ /कस्मिं + रेफः + चित् → कस्मिँ /कस्मिं + ः + चित् → कस्मिँ /कस्मिं + स् + चित् → कस्मिँ /कस्मिं + श्चित् → कस्मिँश्चित् / कस्मिंश्चित्*

एवमेव—
कान् + चित् → काँश्चित् / कांश्चित्

*बोध्यं यत् अत्र समासस्य विषयो नास्ति | 'कस्मिन्' इति पृथक् पदम् अस्ति, चित्/चन अपि पृथक् पदं; तदर्थं 'कस्मिन्' इति पदस्य विभक्तिः इदानीमपि दृश्यते | चित्/चन इति द्वयमपि पदम्, अव्ययञ्च | **नश्छव्यप्रशान्** (८.३.७) इत्यनेन नकारान्तपदस्य एव नकार–स्थाने सकारः | तर्हि अत्र सन्धिः इत्येव विषयः न तु समासः | यथा संहितायां विषये कयोरपि द्वयोः पदयोः सन्धिः भवति, तथैव अत्र |

तर्हि अत्र सन्धिचिन्तनप्रसङ्गे 'कस्मिन्' तु पदमस्ति इति कारणतः 'कस्मिन् + चित्' इति स्थितौ **नश्चापदान्तस्य झलि** (८.३.२४) इत्यस्य प्रसक्तिर्नास्ति | एवमेव सर्वत्र चित्/चन प्रसङ्गे चिन्तनीयं भवति | यथा कम् + चित् इति स्थितौ कम् इत्यस्य पदसंज्ञा इति कारणतः **मोऽनुस्वारः** (८.३.२३) , तदा **वा पदान्तस्य** (८.४.५९) इति भवति न तु **नश्चापदान्तस्य झलि** (८.३.२४) **अनुस्वारस्य ययि परसवर्णः** (८.४.५८) इति | अतः कम् + चित् → कंचित्/कञ्चित् इति रूपद्वयमपि साधु |

**अत्रानुनासिकः पूर्वस्य तु वा** (८.३.२) = अस्मिन् रु–प्रकरणे, रु–इत्यस्मात् पूर्ववर्ति–स्वरस्य स्थाने अनुनासिकादेशो विकल्पेन भवति | अधिकारसूत्रम्—८.३.२ इत्यस्मात् आरभ्य ८.३.१२ पर्यन्तं यत्र यत्र रुत्वं विहितं, तत्र तत्र रु इतस्मात् प्राक् यः वर्णोऽस्ति, तस्य विकल्पेन अनुनासिकादेशो भवति | अस्मिन् रुत्व–प्रकरणे यानि सूत्राणि सन्ति रुत्वविधायकानि, तेषु सूत्रेषु अयम् अर्थः सर्वत्र अन्वेति | अस्मिन् रुत्व–प्रकरणे च रुत्वं विधीयते अपदान्ते एव; पदान्ते रुत्वम् अपरस्मिन् प्रकरणे भवति अतः तत्र प्रकृतसूत्रस्य प्रवर्तनं नास्ति |

अत्र अव्ययपदं, अनुनासिकः प्रथमान्तं, पूर्वस्य षष्ठ्यन्तं, तु अव्ययपदं, वा अव्ययपदम्, अनेकपदमिदं सूत्रम् | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **अत्रानुनासिकः पूर्वस्य तु वा संहितायाम्** |

**अनुनासिकात् परोऽनुस्वारः** (८.३.४) = यस्मिन् पक्षे अनुनासिकादेशो न भवति, तत्र रु–इत्यस्मात् प्राक् यः वर्णः, तस्य नित्यम् अनुस्वार–आगमो भवति | फलितार्थः अयं यत् अनुनासिकः न भवति चेत्, रोः पूर्वं यः वर्णः, तस्य अनन्तरम् अनुस्वारागमो भवति | **अनुनासिकात्** इत्युक्ते अनुनासिकं त्यक्त्वा; नाम यस्मिन् पक्षे अनुनासिको न भवति | अनुनासिकात् पञ्चम्यन्तं, परः प्रथमान्तम्, अनुस्वारः प्रथमान्तं, त्रिपदमिदं सूत्रम् | **मतुवसो रु सम्बुद्धौ छन्दसि** (८.३.१) इत्यस्मात् **रुः** इत्यस्य पञ्चमीविभक्ति–विपरिणामं कृत्वा **रोः** इत्यस्य अनुवृत्तिः | **अत्रानुनासिकः पूर्वस्य तु वा** (८.३.२) इत्यस्मात् पूर्वस्य इत्यस्य पञ्चमीविभक्ति–विपरिणामं कृत्वा **पूर्वस्मात्** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **अनुनासिकात् रोः पूर्वस्मात् परः अनुस्वारः संहितायाम्** |

**खरवसानयोर्विसर्जनीयः** (८.३.१५) = पदान्तस्य रेफस्य स्थाने विसर्गो भवति खरि परे अवसानावस्थायाञ्च | खर् च अवसानं च (तयोरितरेतरयोगद्वन्द्वः), खरवसाने, तयोः खरवसानयोः | खरवसानयोः सप्तम्यन्तं, विसर्जनीयः प्रथमान्तं, द्विपदमिदं सूत्रम् | **रो रि** (८.३.१४) इत्यस्मात् **रोः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन रेफान्तपदस्य न अपि तु पदान्तस्य रेफस्य स्थाने विसर्गादेशो भवति | अनुवृत्ति–सहितसूत्रं— **पदस्य रः विसर्जनीयः खरवासनयोः संहितायाम्** |

**विसर्जनीयस्य सः** (८.३.३४) = विसर्जनीयस्य स्थाने सकारादेशो भवति खरि परे | विसर्जनीयस्य षष्ट्यन्तं, सः प्रथमान्तं, द्विपदमिदं सूत्रम् | **खरवसानयोर्विसर्जनीयः** (८.३.१५) इत्यस्मात् **खरि** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रं— **विसर्जनीयस्य सः खरि संहितायाम्** |

अत्र प्रश्नः उदेति, किमर्थम् अस्यां प्रक्रियायां सकारः पदान्ते भवति चेत् **ससजुषो रुः** (८.२.६६) इत्यनेन पुनः रूत्वं न भवति ? यथा—

गच्छन् + तावता → गच्छ + रु + तावता → गच्छँ / गच्छं + रेफः + तावता → गच्छँ / गच्छं + स् + तावता → अत्र **ससजुषो रुः** (८.२.६६) इत्येनन रु–आदेशः स्यात् | किमर्थं न भवति ?

**ससजुषो रुः** (८.२.६६) = पदान्ते सकारस्य च सजुष्–शब्दस्य षकारस्य च स्थाने रु–आदेशो भवति | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन न केवलं यत् पदं सकारः अस्ति, अपि तु यस्य पदस्य अन्ते सकारः अस्ति | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन पदान्तस्य वर्णस्य स्थाने रु–आदेशः न तु पूर्णपदस्य | सश्च सजुश्च ससजुषौ, इतरेतरद्वन्द्वः, तयोः ससजुषोः | ससजुषोः षष्ठ्यन्तं, रुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **ससजुषोः पदस्य रुः** |

१२. <u>यवलोपसन्धिः</u>

**लोपः शाकल्यस्य** (८.३.१९) = अपूर्वयोः पदान्तयोः वकारयकारयोः लोपो भवति अशि परे शाकल्यस्य मतेन | अपूर्वयोः इत्यनेन तादृशवकारयकारौ याभ्यां पूर्वम् अ–वर्णः स्यात् | **शाकल्यस्य** इत्युक्ते शाकल्यस्य मतेन, नाम इदं विकल्पेन भवति | लोपः प्रथमान्तं,

शाकल्यस्य षष्ठ्यन्तं, द्विपदमिदं सूत्रम् | **व्योलघुप्रयत्नतरः शाकटयनस्य** (८.३.१८) इत्यस्मात् **व्योः** इत्यस्य अनुवृत्तिः | **भोभगोअघोअपूर्वस्य योऽशि** (८.३.१७) इत्यस्मात् **अपूर्वस्य** च **अशि** चेत्यनयोः अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः; वचनविपरिणामं कृत्वा तदन्तविधिं कृत्वा पदान्तयोः | अनुवृत्ति-सहितसूत्रम्— **अपूर्वयोः पदान्तयोः व्योः लोपः अशि संहितायां शाकल्यस्य** |

यथा —

हरे + इह → **एचोऽयवायावः** (६.१.७७) → हरय् + इह → **लोपः शाकल्यस्य** (८.३.१९) → हर इह / हरयिह | अत्र **आद्गुणः** (६.१.८७) इत्यनेन गुणसन्धिः भवति स्म, परन्तु **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन **आद्गुणः** (६.१.८७) इत्यस्य दृष्ट्या **लोपः शाकल्यस्य** (८.३.१९) इत्यनेन यत् कार्यं कारितं, तत् असिद्धम् |

उभौ + अपि → **एचोऽयवायावः** (६.१.७७) → उभाव् + अपि → **लोपः शाकल्यस्य** (८.३.१९) → उभा अपि / उभावपि | अत्र **अकः सवर्णे दीर्घः** (६.१.१०१) इत्यनेन सवर्णदीर्घसन्धिः भवति स्म, परन्तु **पूर्वत्रासिद्धम्** (८.२.१) इत्यनेन **अकः सवर्णे दीर्घः** (६.१.१०१) इत्यस्य दृष्ट्या **लोपः शाकल्यस्य** (८.३.१९) इत्यनेन यत् कार्यं कारितं, तत् असिद्धम् |

इति परिशीलितं दृष्टान्तद्वयमपि अचि परे; अयं च वस्तुतः प्रमुखविषयः एव | किन्तु जिज्ञासा उदेति, हलि परे का गतिः ? **लोपः शाकल्यस्य** (८.३.१९) इत्यनेन 'अशि परे' इत्युक्तं; गीताप्रवेशे लिखितमस्ति यत् "विद्यमानस्य अकारपूर्वस्य आकारपूर्वस्य च यकारस्य वकारस्य च स्वरे परे विकल्पेन लोपो भवति | व्यञ्जने परे तु नित्यम् |" सुबोधार्थम् अयं विचारः दोषाय न, किन्तु सम्पूर्णरीत्या अवगमनार्थम् अग्रे पठनीयम्—

**लोपः शाकल्यस्य** (८.३.१९) इत्यनेन अपूर्वयोः पदान्तयोः वकारयकारयोः लोपः विकल्पेन भवति **अशि परे** | एतावता च अस्माभिः दृष्टं किं भवति अचि परे | किन्तु हश्-वर्णाः अपि सन्ति; तेषु परेषु किं भवति ? एतादृशी परिस्थितिः वस्तुतः विरलतया लभ्यते | तथापि अस्य बोधनार्थम् एकेम् उदाहरणं पश्येम |

'पुरुषाः गच्छन्ति' इति स्थितौ वस्तुतः मूले 'पुरुषास् गच्छन्ति' इति स्थितिः आसीत् | तर्हि अस्मात् आरभ्य एकवारं किं भवति इति अवलोकयाम—

(बहुवचने पुरुष + जस् → पुरुष + अस् →) पुरुषास् गच्छन्ति → **न विभक्तौ तुस्माः** (१.३.४) इत्यनेन सकार-लोपः निषिध्यते → **ससजुषो रुः** (८.२.६६) इत्यनेन स्-स्थाने 'रु' → पुरुषा + रु + गच्छन्ति → रु इत्यस्य उकारस्य इत्-संज्ञालोपश्च → **भोभगोअघोअपूर्वस्य योशि** (८.३.१७) इत्यनेन आकारोतरस्य 'रु'-शब्दस्य रेफस्य यकारादेशः अशि परे → पुरुषाय् + गच्छन्ति → **लोपः शाकल्यस्य** (८.३.१९) इत्यनेन अपूर्वयोः पदान्तयोः वकारयकारयोः लोपः विकल्पेन भवति **अशि परे** → परन्तु **हलि सर्वेषाम्** (८.३.२२) इत्यनेन **हलि परे** अयं यकार्लोपः नित्यः → 'पुरुषा गच्छन्ति' इति एकमेव रूपम् |

तर्हि एतावता फलितार्थः कः इति चेत्, वकारयकारयोः लोपः विकल्पेन भवति अचि परे; हशि परे नित्यं न तु वैकल्पिकम् | हशि किमर्थम् ? यतोहि **लोपः शाकल्यस्य** (८.३.१९) इत्यनेन अशि परे लोपः वैकल्पिकः; **हलि सर्वेषाम्** (८.३.२२) इत्यनेन हलि परे नित्यम् | अश् ऊन अच् इत्युक्ते हश्; हश् हलि अस्ति अतः हशि परे चेत् लोपः नित्यः | खरि परे का गतिः ? खरि परे इयं परिस्थितिः न सम्भवति; यकारः न उदेति एव | पुरुषास् + चरन्ति → **ससजुषो रुः** (८.२.६६) इत्यनेन स्-स्थाने 'रु' → **खरवसानयोर्विसर्जनीयः** (८.३.१५) इत्यनेन पदान्तस्य रेफस्य स्थाने विसर्गो भवति खरि परे → पुरुषाः + चरन्ति → संहितायां विषये विसर्गस्य सकारः तदा **स्तोः श्चुना श्चुः** (८.४.४०) इत्यनेन श्चुत्वम् → पुरुषाश्चरन्ति

अन्यच्च हलि परे यकारस्य का गतिः इत्युक्तम् | अधुना हलि परे वकारस्य का गतिः ? हलि परे वकारो न भवति एव इति कृत्वा यकारस्य चिन्तनम् अलम् | 'वकारान्तपदम्' इति तु तादृशं किमपि नास्ति; तदा सन्धिक्रमेऽपि तादृश्यं किमपि कार्यं नास्ति यस्मात् वकारः सम्भवेत् |

**न विभक्तौ तुस्माः** (१.३.४) = धातूनां तिङ्-प्रत्ययाः, सुबन्तानाम् (इत्युक्ते नामपदानां) सुप्-प्रत्ययाः—एते सर्वे विभक्तयः इत्युच्यन्ते (**विभक्तिश्च** इति सूत्रेण) | एषां विभक्तीनां अन्ते यदि तवर्गीयः वर्णः (त्, थ्, द्, ध्, न्), सकारः, अथवा मकारः अस्ति, तर्हि इदं सूत्रं **हलन्त्यम्** इत्यस्य कार्यं बाधते | **हलन्त्यम्** इत्यनेन एषां वर्णानाम् इत्-संज्ञा भवति स्म, किन्तु **न विभक्तौ तुस्माः** इत्यनेन इत्-संज्ञा बाधिता भवति; अनेन इत्-संज्ञा न भवति | यथा सुप्-प्रत्ययाः जस्, भ्याम्, भिस्, अपि च तिङ्-प्रत्ययाः तस्, वस्, मस्—अत्र भ्याम् इत्यस्य मकारः, तस् इत्यस्य सकारः, एषां वर्णानाम् इत्-संज्ञा भवति स्म, किन्तु न भवति |

**ससजुषो रुः** (८.२.६६) = पदान्ते सकारस्य च सजुष्-शब्दस्य षकारस्य च स्थाने रु-आदेशो भवति | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन न केवलं यत् पदं सकारः अस्ति, अपि तु यस्य पदस्य अन्ते सकारः अस्ति | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन पदान्तस्य वर्णस्य स्थाने रु-आदेशः न तु पूर्णपदस्य | सश्च सजुश्च ससजुषौ, इतरेतरद्वन्द्वः, तयोः ससजुषोः | ससजुषोः षष्ठ्यन्तं, रुः प्रथमान्तं, द्विपदमिदं सूत्रम् | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **ससजुषोः पदस्य रुः** |

**खरवसानयोर्विसर्जनीयः** (८.३.१५) = पदान्तस्य रेफस्य स्थाने विसर्गो भवति खरि परे अथवा अवसानावस्थायाम् | खर् च अवसानं च (तयोरितरेतरयोगद्वन्द्वः), खरवसाने, तयोः खरवसानयोः | खरवसानयोः सप्तम्यन्तं, विसर्जनीयः प्रथमान्तं, द्विपदमिदं सूत्रम् | **रो रि** (८.३.१४) इत्यस्मात् **रोः** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन रेफान्तपदस्य न अपि तु पदान्तस्य रेफस्य स्थाने विसर्गादेशो भवति | अनुवृत्ति-सहितसूत्रं— **खरवासनयोः पदस्य रः विसर्जनीयः संहितायाम्** |

१३. <u>तुगागमसन्धिः</u>

**छे च** (६.१.७२) = छकारे परे ह्रस्वस्वरस्य तुक्-आगमो भवति | तुक् कित् अस्ति अतः **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन यस्य आगमः अस्ति (अत्र 'ह्रस्वस्वरस्य'), तस्य अन्ते आयाति | छे सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **ह्रस्वस्य पिति कृति तुक्** (६.१.७०) इत्यस्मात् **ह्रस्वस्य, तुक्** इत्यनयोः अनुवृत्तिः | **संहितायाम्** (६.१.७१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **ह्रस्वस्य तुक् छे च संहितायाम्** |

यथा—

वृक्षस्य छाया → समासे कृते → वृक्ष + छाया → वृक्ष + तुक् + छाया → वृक्ष + त् + छाया → **स्तोः श्चुना श्चुः** (८.४.४०) → वृक्ष + च् + छाया → वृक्षच्छाया

**पदान्ताद्वा** (६.१.७५) = दीर्घात्पदान्तात् छे परे तुग्वा स्यात् | पदान्तात् पञ्चम्यन्तं, वा अव्ययपदं, द्विपदमिदं सूत्रम् | **छे च** (६.१.७२) इत्यस्मात् **छे** इत्यस्य अनुवृत्तिः | **दीर्घात्** (६.१.७४) इत्यस्य पुर्णतया अनुवृत्तिः | **ह्रस्वस्य पिति कृति तुक्** (६.१.७०) इत्यस्मात् **तुक्** इत्यस्य अनुवृत्तिः | **संहितायाम्** (६.१.७१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रं— **दीर्घात् पदान्तात् तुक् छे वा संहितायाम्** |

यथा—

मात्रा + छन्दः → **पदान्ताद्वा** (६.१.७५) → मात्राछन्दः (अथवा) → मात्रा + तुक् + छन्दः → **स्तोः श्चुना श्चुः** (८.४.४०) → मात्रा + च् + छन्दः → मात्राच्छन्दः / मात्राछन्दः

१४. <u>द्वित्वम्</u>

**अनचि च** (८.४.४७) = अचः परस्य यरो द्वे वा स्तः न त्वचि | न अच्, अनच् नञ्तत्पुरुषः, तस्मिन् अनचि | अनचि सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् | **यरोऽनुनासिकेऽनुनासिको वा** (८.४.४५) इत्यस्मात् **यरः**, **वा** इत्यनयोः अनुवृत्तिः | **अचो रहाभ्यां द्वे** (८.४.४७) इत्यस्मात् **अचः**, **द्वे** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अचः यरः द्वे वा अनचि च संहितायाम्** |

सुधी + उपास्यः → **इको यणचि** (६.१.७६) → सुध्य् + उपास्यः → **अनचि च** (८.४.४७) इत्यनेन यरः वा द्वित्वम् → सुध्ध्य् + उपास्यः → **झलां जश् झशि** (८.४.५३) इत्यनेन जश्त्वम् → सुद्ध्य् + उपास्यः → सुद्ध्युपास्यः / सुध्युपास्यः

<u>हल्-सन्धीनां क्रमः कथं ज्ञायते ?</u>

**पूर्वत्रासिद्धम्** (८.२.१) = अनेन सूत्रेण अष्टाध्यायी इति ग्रन्थः भागद्वये विभजितः | प्रथमाध्यायस्य आरम्भतः अष्टमाध्यायस्य प्रथमपादस्य अन्तपर्यन्तं प्रथमभागः; अष्टमाध्यायस्य द्वितीयः, तृतीयः, चतुर्थश्च पादाः मिलित्वा द्वितीयभागः | प्रथमभागस्य नाम सपादसप्ताध्यायी; द्वितीयभागस्य नाम त्रिपादी | अनेन सूत्रेण यानि सूत्राणि सपादसप्ताध्याय्यां सन्ति, तानि प्रति त्रिपाद्यां स्थितानि सूत्राणि असिद्धानि | अपि च त्रिपाद्यां यानि सूत्राणि पूर्वं सन्ति, तानि प्रति परं स्थितानि सूत्राणि असिद्धानि | सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् | त्रयाणां पादानां समाहारः त्रिपादी (द्विगुसमासः) | सप्तानाम् अध्यायानां समाहारः सप्ताधायी; पादेन सहिता, सपादसप्ताध्यायी | पूर्वस्मिन् इति पूर्वत्र | न सिद्धम्, असिद्धम् | पूर्वत्र अव्ययम्, असिद्धं प्रथमान्तं, द्विपदमिदं सूत्रम् | इदं सूत्रम्

अधिकारसूत्रम्; अष्टाध्याय्याः अन्तपर्यन्तं प्रवर्तते |

(**पूर्वत्रासिद्धम्** (८.२.१) इत्यस्य कार्यं द्विविधं— **शास्त्रासिद्धं**, **कार्यासिद्धं** च | द्वयोः सूत्रयोः प्रसक्तिः समानकाले समानस्थले चेत्, परत्रिपादिसूत्रं स्वयम् असिद्धम् इति कारणात् शास्त्रासिद्धम् इत्युच्यते | पूर्वमेव त्रिपादिसूत्रस्य कार्यं कारितं चेत्, तर्हि तत्पश्चात् सपादसप्ताध्यायिसूत्रं वा पूर्वत्रिपादिसूत्रं वा आयाति चेत्, तयोः मनसि परत्रिपादिसूत्रस्य कारितं कार्यं न दृश्यते एव यतः तेन परत्रिपादिसूत्रेण यत् किमपि क्रियते तत् **पूर्वत्रासिद्धम्** इत्यनेन असिद्धम्; इदं कार्यासिद्धम् इत्युच्यते |)

हल्–सन्धि–सूत्राणि सर्वाणि त्रिपाद्याम् | अतः एकत्र हल्–सन्धि–विधायकसूत्रद्वयम् आयाति चेत्, परसूत्रस्य असिद्धत्वात् पूर्वसूत्रम् आगत्य कार्यं करोति | यत् + जायते → **झलां जशोऽन्ते** (८.२.३९), **स्तोः श्चुना श्चुः** (८.४.४०) एकत्र आयातः → **स्तोः श्चुना श्चुः** इत्यस्य असिद्धत्वात् **झलां जशोऽन्ते** पूर्वं भवति → यद् + जायते → **स्तोः श्चुना श्चुः** इत्यनेन श्चुत्वम् → यज् + जायते → यज्जायते | एवमेव सर्वाणि हल्–सन्धि–सूत्राणि |

<u>हल्–सन्धिः – सूत्रक्रमः</u>

| | सन्धिः | सूत्रसंख्या | सूत्रम् | लघु संख्या |
|---|---|---|---|---|
| १ | जश्त्वसन्धिः | ८.२.३९ | **झलां जशोऽन्ते** | ६७ |
| २ | यवलोपसन्धिः | ८.३.१९ | **लोपः शाकल्यस्य** | ३० |
| ३ | अनुस्वारसन्धिः | ८.३.२३<br>८.३.२४ | **मोऽनुस्वारः**<br>**नश्चापदान्तस्य झलि** | ७७<br>७८ |
| ४ | ङमुडागमसन्धिः | ८.३.३२ | **ङमो ह्रस्वादचि ङमुण् नित्यम्** | ८९ |
| ५ | श्चुत्वसन्धिः | ८.४.४० | **स्तोः श्चुना श्चुः** | ६२ |
| ६ | ष्टुत्वसन्धिः | ८.४.४१ | **ष्टुना ष्टुः** | ६४ |
| ७ | अनुनासिकसन्धिः | ८.४.४५ | **यरोऽनुनासिकेऽनुनासिको वा** | ६८ |
| ८ | चर्त्वसन्धिः | ८.४.५५ | **खरि च** | ७४ |
| ९ | परसवर्णसन्धिः | ८.४.५८<br>८.४.५९<br>८.४.६० | **अनुस्वारस्य ययि परसवर्णः**<br>**वा पदान्तस्य**<br>**तोर्लि** | ७८<br>८०<br>६९ |
| १० | पूर्वसवर्णसन्धिः | ८.४.६२ | **झयो होऽन्यतरस्याम्** | ७५ |
| ११ | छत्वसन्धिः | ८.४.६३ | **शश्छोऽटि** | ७६ |

परिशिष्टं— पदान्ते नकारः, ततः अग्रे शकारः

सन् + शम्भुः → चत्वारि रूपाणि— सञ्छम्भुः, सञ्च्छम्भुः, सञ्च्शम्भुः, सञ्शम्भुः |

सन् + शम्भुः → **शि तुक्** (८.३.३१) इत्यनेन तुक्–आगमः विकल्पेन → सन् + त् + शम्भुः → **स्तोः श्चुना श्चुः** (८.४.४०) इत्यनेन तकारस्य चुत्वादेशः → सन् + च् + शम्भुः → **स्तोः श्चुना श्चुः** (८.४.४०) इत्यनेन नकारस्य चुत्वादेशः → सञ् + च् + शम्भुः → **शश्छोऽटि** (८.४.६३) इत्यनेन झयः उत्तरस्य शकारस्य अटि परे छकारादेशः विकल्पेन → सञ् + च् + छम्भुः → **झरो झरि सवर्णे** (८.४.६५) इत्यनेन हल्–उत्तरस्य झरः विकल्पेन लोपः सवर्णझरि परे → सञ् + छम्भुः → सञ्छम्भुः इति प्रथमं रूपम् |

**झरो झरि सवर्णे** (८.४.६५) इत्यनेन विकल्पेन चकारस्य लोपो न भवति चेत् सञ्च्छम्भुः इति द्वितीयरूपं; **शश्छोऽटि** (८.४.६३) इत्यनेन विकल्पेन छकारादेशो न भवति चेत् सञ्च्शम्भुः इति तृतीयं रूपं; **शि तुक्** (८.३.३१) इत्यनेन विकल्पेन तुक्–आगमो न भवति चेत् सञ्शम्भुः इति चतुर्थरूपम् |

एवमेव यत्र यत्र पदान्ते नकारः ततः अग्रे शकारः, तत्र सर्वत्र वैकल्पिकरूपचतुष्टयम् | पश्यन् + शृण्वन् | गच्छन् + शिक्षकः |

**शि तुक्** (८.३.३१) = पदान्तस्य नकारस्य विकल्पेन तुक्–आगमो भवति शकारे परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तदन्तविधिः 'नः पदस्य' | **आद्यन्तौ टकितौ** (१.१.४६) इत्यनेन तुक् आगमः पदान्तनकारस्य अनन्तरम् | शि सप्तम्यन्तं, तुक् प्रथमान्तं, द्विपदमिदं सूत्रम् | **नश्च** (८.३.३०) इत्यस्मात् **नः** इत्यस्य अनुवृत्तिः | **हे मपरे वा** (८.३.२६) इत्यस्मात् **वा** इत्यस्य अनुवृत्तिः | **पदस्य** (८.१.१६) इत्यस्य अधिकारः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **नः पदस्य तुक् शि वा संहितायाम्** |

**झरो झरि सवर्णे** (८.४.६५) = हल्–उत्तरस्य झरः विकल्पेन लोपः सवर्णझरि परे | झरः षष्ठ्यन्तं, झरि सप्तम्यन्तं, सवर्णे सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **हलो यमां यमि लोपः** (८.४.६४) इत्यस्मात् **हलः**, **लोपः** चेत्यनयोः अनुवृत्तिः | **झयो होऽन्यतरस्याम्** (८.४.६२) इत्यस्मात् **अन्यतरस्याम्** इत्यस्य अनुवृत्तिः | **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रं— **हलः झरः लोपः अन्यतरस्यां सवर्णे झरि संहितायाम्** |

Swarup – March 2014 (additions October 2017)